**Series : YXWZ4**

**SET ~ 4**

प्रश्न-पत्र कोड
**Q.P. Code** **22**

रोल नं.
**Roll No.**

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Q.P. Code on the title page of the answer-book.

**नोट / NOTE :**

(I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **19** हैं।
Please check that this question paper contains **19** printed pages.

(II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.

(III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं।
Please check that this question paper contains **18** questions.

(IV) **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।**
**Please write down the Serial Number of the question in the answer-book at the given place before attempting it.**

(V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

#

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*समयः : होरात्रयम्* *पूर्णाङ्काः : **80***
*निर्धारित समय : **3** घण्टे* *अधिकतम अंक : **80***
*Time allowed : **3** hours* *Maximum Marks : **80***

***General Instructions :***

*Question paper is divided into* ***4*** *sections.*

*It has total* ***18*** *questions.*

***Section A*** *– 1 Question no. 1*

***Section B*** *– 3 Questions no. 2 to 4*

***Section C*** *– 4 Questions no. 5 to 8*

***Section D*** *– 10 Questions no. 9 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

**सामान्य निर्देशा:**

अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति।

अस्मिन् प्रश्नपत्रे अष्टादश **(18)** प्रश्ना: सन्ति।

**खण्ड: 'क'** – 1 – प्रश्नसंख्या 1

**खण्ड: 'ख'** – 3 – प्रश्नसंख्या 2 – 4

**खण्ड: 'ग'** – 4 – प्रश्नसंख्या 5 – 8

**खण्ड: 'घ'** – 10 – प्रश्नसंख्या 9 – 18

विशिष्ट–निर्देशानुसारं प्रश्ना: समाधेया:।

उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया।

## खण्डः 'क'

## अपठितांश-अवबोधनम् *10 अङ्काः*

## अपठितांश अवबोधन

## Unseen Reading Comprehension

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।
निम्नलिखित गद्यांश को पढ़कर दिये गए प्रश्नों के उत्तर संस्कृत में लिखिए।
Read the following passage and answer the given questions in Sanskrit.

सेवा अस्माकं परमधर्मः। सेवायाः अयम् एव अभिप्रायः यत् मानवः परस्परं सम्यग् रूपेण साहाय्यं कुर्यात्। सर्वो हि विविधरूपेण सक्षमः। स्वक्षमतया परेभ्यः सहयोग-प्रदानेन हि जीवनस्य सार्थक्यं भवति। सेवा द्विविधा भवति – पारमार्थिकी लौकिकी च। पारमार्थिक-सेवया महात्मानः जनेभ्यः ज्ञानं यच्छन्ति। ते तेषां दोषनिवारणार्थं पारस्परिकं वैमनस्यं च दूरीकर्तुं प्रयतन्ते। सांसारिकसम्बन्धेषु लौकिकसेवाया अपि महत्त्वम् विद्यते। एकस्य असहायस्य सेवा लौकिकी सेवा भवति। अनया समाजे शोभनाः सम्बन्धाः जायन्ते। जनानां समस्यानां समाधानम् अपि भवति। जनाः सदैव एतदेव चिन्तयन्तु – यद् यावद् वयं स्वस्थाः सक्षमाः तावद् अस्माकं परमं कर्तव्यं सामाजिक सेवा भवेदिति। वस्तुतः अयमेव मानवीयधर्मः।

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) *2×1=2*

(i) मानवः परस्परं सम्यक् किं कुर्यात् ?

(ii) महात्मानः जनेभ्यः किं यच्छन्ति ?

(iii) लौकिकी सेवया समाजे कीदृशाः सम्बन्धाः जायन्ते ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) *2×2=4*

(i) सेवायाः कः अभिप्रायः ?

(ii) कस्य सेवा लौकिकी सेवा भवति ?

(iii) जनाः सदैव किं चिन्तयन्तु ?

(इ) अस्य अनुच्छेदस्य द्वित्रिशब्दात्मकं समुचितं शीर्षकं लिखत।
इस अनुच्छेद का दो या तीन शब्दों में उचित शीर्षक लिखिए।
Write a suitable title for this passage in two or three words. *1×1=1*

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्)

निर्देशानुसार उत्तर दीजिए : (केवल तीन प्रश्न)

Answer as directed : (Only three questions) *3×1=3*

(i) 'वैमनस्यं' इति पदस्य विशेषणपदं चिनुत :

(A) पारस्परिकम्

(B) सार्थक्यम्

(C) वयम्

(D) अस्माकम्

(ii) पारमार्थिक-सेवया महात्मान: जनेभ्य: ज्ञानं यच्छन्ति । अत्र 'महात्मान:' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(A) पारमार्थिक-सेवया

(B) यच्छन्ति

(C) जनेभ्य:

(D) ज्ञानम्

(iii) 'अक्षम:' इति पदस्य विलोमपदं चिनुत :

(A) स्वस्थ:

(B) सार्थक्यम्

(C) साहाय्यम्

(D) सक्षम:

(iv) 'ते तेषां दोषनिवारणार्थं प्रयतन्ते' अत्र वाक्ये 'ते' इति सर्वनामपदं केभ्य: प्रयुक्तम् ?

(A) 'जनेभ्य:'

(B) 'महात्मान:' इति कृते

(C) 'सेवाया:' इति कृते

(D) मानवेभ्य:

## खण्डः 'ख'

## रचनात्मक-कार्यम्

## रचनात्मक कार्य

## Writing Skills

*15 अङ्काः*

**2.** भवती श्रुतिः । भवत्सखी मुंबई नगरे वसति । भवत्याः विद्यालये एका पर्यावरणगोष्ठी सञ्जाता । गोष्ठीं वर्णयन्ती श्रुतिः स्वसखीं मीनाक्षीं प्रति पत्रं लिखति । अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषापदैः पूरयित्वा पत्रं पुनः लिखत ।

आप श्रुति हैं । आपकी सखी मुंबई नगर में रहती है । आपके विद्यालय में एक पर्यावरण गोष्ठी हुई थी । गोष्ठी का वर्णन करते हुए आप अपनी सखी मीनाक्षी को पत्र लिख रही हैं । इस पत्र में दिए गए रिक्त स्थानों को मञ्जूषा के पदों की सहायता से पूर्ण कर पत्र को पुनः लिखिए ।

You are Shruti. Your friend live in Mumbai. A seminar on environment was organised in your school. Describing the seminar Shruti wrote a letter to Meenakshi. Fill in the blanks in the letter from the words given in the box and rewrite the same. $10\times\frac{1}{2}=5$

**पत्रम्**

दिल्लीतः

दिनाङ्कः ________

प्रियसखि (i) ________ !

सप्रेम (ii) ________ !

गतसप्ताहे अस्माकं विद्यालये पर्यावरणविषये एका पर्यावरणगोष्ठी सम्पन्ना । तस्यां महानगरेषु प्रवर्धमानं (iii) __________ दृष्ट्वा (iv) __________ रक्षणाय तस्य उपायानां विषये (v) ________ स्वविचाराः प्रकटिताः । ते अकथयन् यत् पारिवारिकैः (vi) ________ रथ्यासु अवकरः न क्षेप्तव्यः । जलप्रदूषणं दूरीकर्तुं नगरपालिकायाः (vii) __________ सूचनीयाः । जनानां प्रबोधनाय यथास्थानं 'जलमेव जीवनं' 'वृक्षाः रक्षणीयाः' इत्यादिकाः लेखपट्टिकाः स्थापयितव्याः । वाटिकासु, उद्यानेषु विद्यालयेषु च वृक्षाः (viii) __________ । ध्वनिप्रसारक-यन्त्राणां प्रयोगः यथाशक्यं न विधातव्यः ।

अस्मिन् विषये भवद्विद्यालये यदि एतादृशी गोष्ठी भवेत् तर्हि (ix) ___________ ।

पितृभ्यां नमः ।

भवत्याः सखी

(x) ___________ ।

**मञ्जूषा**

| |
|---|
| नमस्ते, मीनाक्षि !, प्रदूषणं, वैज्ञानिकैः, श्रुतिः, पर्यावरणस्य, सदस्यैः, रोपणीयाः, अधिकारिणः, सूचयितव्या । |

3. (क) मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखित-लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत।

मञ्जूषा में दिए गए शब्दों की सहायता से नीचे लिखी लघुकथा में रिक्त स्थान भरकर कथा को पुन: लिखिए।

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same. $10\times\frac{1}{2}=5$

कस्मिंश्चिद् ग्रामे कश्चन (i) __________ वृद्ध: आम्रवृक्षस्य आरोपणं करोति स्म। तदैव (ii) __________ आगत: कश्चन युवा तं वृद्धम् दृष्ट्वा (iii) __________ "भो वृद्ध ! आम्रवृक्षा: तु प्राय: द्वादशवर्षानन्तरं (iv) __________ । तव अवस्थां (v) __________ तु प्रतीयते यत् यदा अयं वृक्ष: (vi) __________ दास्यति, तदा त्वं जीवित: न (vii) __________ । अत: वृथा (viii) __________ ? एतत् निशम्य वृद्ध: तत्र फलयुक्तान् वृक्षान् दर्शयित्वा (ix) __________ "यथा मया अन्यै: आरोपितानां वृक्षाणां फलानि खादितानि, एवमेव अन्येऽपि मया आरोपितानां वृक्षाणां फलानि खादिष्यन्ति – इति (x) __________ एव अहम् आम्रवृक्षम् आरोपयामि।

**मञ्जूषा**

| |
|---|
| अकथयत्, विचार्य, अशीतिवर्षीय:, नगराद्, दृष्ट्वा, परिश्रमेण, भविष्यसि, फलन्ति, फलानि, अपृच्छत्। |

**अथवा (OR)**

(ख) अधोलिखित-संवादे रिक्तस्थानानि मञ्जूषाप्रदत्त-वाक्यै: पूरयत :

निम्नलिखित संवाद में रिक्त स्थान मंजूषा में दिए गए वाक्यों से भरिए :

Fill in the blanks in the following conversation with the help of given sentences in box : $5\times1=5$

*अनिल:* — भो अजय ! किं त्वं जानासि यत् गान्धिमहोदयानां जन्मदिवस: कदा भवति ?

*अजय:* — मित्र अनिल ! (i) ____________________ ।

*अनिल:* — आम् ! अक्टूबर-मासस्य द्वितीये दिवसे तु अस्माकं पूर्वप्रधानमन्त्रिण: अपि जन्मदिवस: भवति। जानासि तस्य नाम किम् ?

*अजय:* — आम् (ii) ____________________ ।

*अनिल:* — शोभनम्। सत्यमुक्तम्। स: लालबहादुर: शास्त्री तु सौम्यप्रकृति:, राष्ट्रभक्त: परिश्रमी च आसीत्। अस्मिन् दिने कीदृग्-वस्त्राणां मूल्यं न्यूनं भवति ?

*अजय:* — जानामि। (iii) ____________________ ।

*अनिल:* — शोभनम् – खादीवस्त्राणां निर्माणं तु कुटीरोद्योगे भवति। खादीवस्त्र-निर्माणाय प्रमुखं यन्त्रं किमासीत् ?

*अजय:* — मित्र ! (iv) ____________________ ।

*अनिल:* — शोभनम् । चरखा-यन्त्रं तु स्वतन्त्रतान्दोलनेऽपि प्रमुखं साधनमासीत् । खादीवस्त्राणाम् उपयोगं प्रमुखरूपेण के कुर्वन्ति ?

*अजय:* — (v) ____________________ ।

*अनिल:* — शोभनम् । नेतारस्तु खादीवस्त्रेषु शोभना: दृश्यन्ते । शोभना खल्वेषा वेशभूषा । अत: सर्वै: जनै: अपि खादीवस्त्राणाम् उपयोग: करणीय: ।

**मञ्जूषा**

| |
|---|
| चरखा यन्त्रम् आसीत् । |
| जाने, श्री लालबहादुर: शास्त्री । |
| खादीवस्त्राणाम् उपयोगं प्रमुखरूपेण नेतार: कुर्वन्ति । |
| गान्धीमहोदयानां जन्मदिवस: अक्टूबर-मासस्य द्वितीये दिवसे भवति । |
| अस्मिन् दिने खादीवस्त्राणां मूल्यं न्यूनं भवति । |

**4.** अधोलिखित-वाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत ।
निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए ।
Translate any **five** sentences in Sanskrit from the following sentences. *5×1=5*

(i) छात्र संस्कृत गीत गाते हैं ।
The students sing a Sanskrit song.

(ii) जल ही जीवन है ।
Water is life.

(iii) अर्णव संस्कृत पढ़ता है ।
Arnav reads Sanskrit.

(iv) हम सब घूमने के लिए गाँव जाते हैं ।
We all go to village for a tour.

(v) तुम सब आज विद्यालय जाओगे ।
You all will go to school today.

(vi) कल विद्यालय में अवकाश था ।
Yesterday was a holiday in school.

(vii) विद्यालय के चारों तरफ वृक्ष हैं ।
There are trees all around the school.

**खण्डः 'ग'**

**अनुप्रयुक्त-व्याकरणम्** *20 अङ्काः*

**अनुप्रयुक्त-व्याकरण**

**Applied Grammar**

**5.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। (प्रश्नषट्कम् केवलम्)

निम्नलिखित वाक्यों में रेखांकित पदों का सन्धि अथवा सन्धि-विच्छेद करके लिखिए। (केवल छह प्रश्न)

Disjoin or join sandhis in the underlined words of the following sentences. (Only six questions) *6×1=6*

(i) सत्यान्न प्रमदितव्यम्।

(ii) अथ कुतः उत्पन्नोऽयं दोषः।

(iii) योगेन + अन्ते तनुत्यजाम्।

(iv) त्वया यथोचितं व्यवहरिष्यति।

(v) स्वागतम् अतिथये।

(vi) तत् + अन्वये शुद्धिमति प्रसूतः।

(vii) कामः क्रोधः + तथा लोभः।

**6.** अधोलिखित-वाक्येषु रेखाङ्कितपदानाम् उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत।

(केवलं प्रश्नपञ्चकम्)

निम्नलिखित वाक्यों में रेखांकित पदों का उचित समस्तपद या उचित विग्रह को प्रदत्त विकल्पों से चुनकर लिखिए। (केवल पाँच प्रश्न)

Select the appropriate expound from the given choices for the underlined words 'समस्तपद' or 'विग्रह' of the following sentences.

(Only five questions) *5×1=5*

(i) आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी:।

(A) प्रजाया: तन्तुम्

(B) प्रजायां तन्तुम्

(C) प्रजां तन्तुम्

(D) प्रजायै तन्तुम्

(ii) येन अकार्यं करिष्यति।

(A) अन् कार्यम्

(B) मा कार्यम्

(C) न कार्यम्

(D) आदि कार्यम्

(iii) वार्द्धके मुनीनां वृत्ति: येषां तेषाम्।

(A) मुनये-वृत्तीनाम्

(B) मुनिवृत्तीनाम्

(C) मुनीवृत्तीनाम्

(D) मुनिवृत्तय:

(iv) त्वया <u>यथोचितं</u> व्यवहरिष्यति।

(A) यथा उचितम्

(B) यथा अनुचितम्

(C) उचितं यथा

(D) उचितम् अनतिक्रम्य

(v) कोकिलानां <u>मधुराणि वचांसि</u> श्रुत्वा सर्वे प्रसन्नाः भवन्ति।

(A) मधुरवचः

(B) मधुवचः

(C) मधुरवचांसि

(D) मधुरवचसाम्

(vi) <u>धर्मार्थकामाः</u> जीवने साधनीयाः।

(A) धर्मः च अर्थः च कामः च

(B) धर्मम् अर्थम् कामम्

(C) धर्मेण अर्थकामौ

(D) कामम् च अर्थम् च धर्मः च

(vii) लब्धमिमं प्राप्स्ये <u>मनोरथम्</u>।

(A) मनसः रथम्

(B) मनः रथम्

(C) मनसि रथम्

(D) मनसे रथम्

**7.** अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृति-प्रत्यययोगं प्रदत्तविकल्पेभ्यः चिनुत। (केवलं प्रश्नषट्कम्)

निम्नलिखित वाक्यों में रेखांकित पदों के उपयुक्त संयुक्त अथवा विभक्त प्रकृति-प्रत्यय योग को दिए गए विकल्पों में से चुनिए। (केवल छह प्रश्न)

From the given choices, choose the correct combination of joint or disjoint set of suffix for the underlined words in the following sentences.

(Only six questions) *6×1=6*

(i) एवम् <u>उपासितव्यम्</u>।

(A) उप + अस् + ल्यप्

(B) उप + आस् + तव्यत्

(C) उप + अस् + क्त

(D) उप + आस् + अनीयर्

(ii) भवदभिषेको <u>नि + वृत् + क्त</u>।

(A) निवृत्तवान् (B) निवृत्य

(C) निवृत्तः (D) निवार्य

(iii) अङ्गुलीव <u>उरगक्षता</u>।

(A) उरगक्षत + क्त (B) उरगक्षत + टाप्

(C) उरगक्षत + तव्यत् (D) उरगक्षत + क्तवतु

(iv) शठः सहस्रैरपि <u>शिक्ष्यमाणः</u>।

(A) शिक्ष् + मतुप् (B) शिक्ष् + शतृ

(C) शिक्ष्य् + तव्यत् (D) शिक्ष् + शानच्

(v) राजाज्ञा <u>पालनीया</u>।

(A) पाल् + अनीयर्

(B) पल् + अनीयर्

(C) पाल् + नीया

(D) पाल् + तव्यत्

(vi) सिद्धोऽहं <u>बलवान्</u> सुखी।

(A) बल + शानच्

(B) बल + क्तवतु

(C) बल + मतुप्

(D) बल + इन्

(vii) नास्ति मत्कृते <u>आवश्यकता</u> अवलम्बनस्य।

(A) आवश्यक + क्तवतु

(B) आवश्यक + तल्

(C) आवश्यक + तव्यत्

(D) आवश्यक + टाप्

**8.** समुचितम् उपपद-विभक्तिरूपं चिनुत। (केवलं प्रश्नत्रयम्)

उपयुक्त उपपद विभक्ति रूप को चुनिए। (केवल तीन प्रश्न)

Choose the appropriate subordinate clause form. (Only three questions) *3×1=3*

(i) नूनं वसुमती ________ समं यास्यति।

(A) तुभ्यम्

(B) त्वया

(C) त्वम्

(D) त्वाम्

(ii) हा धिक् ________ !

(A) वयम्

(B) अस्माभि:

(C) अस्मान्

(D) अस्माकम्

(iii) ________ न प्रमदितव्यम्।

(A) कुशलम्

(B) कुशलेन

(C) कुशलात्

(D) कुशलस्य

(iv) अहम् अधुनैव ________ पारदभस्म ददामि।

(A) त्वाम्

(B) तुभ्यम्

(C) तव

(D) त्वया

**खण्डः 'घ'**

**(i) पठितांशावबोधनम्** *25 अङ्काः*

**पठितांश अवबोधन**

**Reading Comprehension**

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following prose passage and answer the questions based on them in Sanskrit. *5*

पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये 'भोज' इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यान् आहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास – यद्यहं राज्यलक्ष्मी-भारधारण-समर्थं सहोदरम् अपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद् विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिः वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच।

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) कस्मिन् राज्ये सिन्धुल-संज्ञः राजा प्रजाः पर्यपालयत्?

(ii) राज्ञः कदा 'भोज' इति पुत्रः समजनि?

(iii) राज्ञः सिन्धुलस्य अनुजः कः आसीत्?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) *2×1=2*

(i) पिता आत्मनः जरां ज्ञात्वा पुत्रं च बालं संवीक्ष्य किं विचारयामास?

(ii) पुत्रहानिः वंशोच्छेदश्च इति विचार्य राज्ञा किं कृतम्?

(iii) राजा बालपुत्राय राज्यप्रदाने किमनर्थं चिन्तयति?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) *2×1=2*

(i) 'राजा' इति कर्तृपदस्य क्रियापदं किम्?

(ii) 'अधुना' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम्?

(iii) राजा मुञ्जम् महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास। अत्र वाक्ये 'मुञ्जम्' इति पदस्य विशेषणपदं किं प्रयुक्तम्?

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following poetry and answer the questions based on them in Sanskrit. *5*

कर्णामृतं सूक्तिरसं विमुच्य,
दोषेषु यत्नः सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविश्य,
क्रमेलकः कण्टकजालमेव ॥

**प्रश्नाः**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) केषां यत्नः दोषेषु भवति ?

(ii) सूक्तिरसं कीदृशं भवति ?

(iii) कः कण्टकजालं निरीक्षते ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)
Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) किं विमुच्य खलानां यत्नः दोषेषु एव भवति ?

(ii) क्रमेलकः कुत्र प्रविशति ?

(iii) क्रमेलकः केलिवने किं निरीक्षते ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)
निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)
Answer as directed : (Only two questions) $2\times1=2$

(i) 'यत्नः' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?

(ii) 'दुष्टानाम्' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम् ?

(iii) 'गुणेषु' इति पदस्य कृते विलोमपदं किं प्रयुक्तम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following part of a drama and answer the questions based on them in Sanskrit. *5*

*कुण्डला* — परस्परप्रीतिमतो: भवतो: उपदेशस्य नास्ति कोऽपि अवकाश: तदापि सखीस्नेह: मां भाषयति – भर्त्रा सदैव भार्या भर्तव्या रक्षितव्या च। यतो हि धर्मार्थ-काम-संसिद्धये यथा भार्या भर्तु: सहायिनी भवति तथा न कोऽपि अन्य:। परस्परमनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयत:। पति: यदि प्रभूतं धनम् अर्जयित्वा गृहमानयति – तत्खलु पत्न्यभावे कुपात्रेषु दीयमानं क्षयमेति।

*ऋतध्वज:* — लक्ष्म्या: रक्षार्थं पत्न्या: सहयोग: अनिवार्य:।

*मदालसा* — कुण्डले ! लक्ष्मीपूजायां न मे प्रवृत्ति:। यदि लक्ष्मी: पूज्या प्रिया च अतिथिवर्यस्य, तदा इदानीमेव मे नमस्कार:।

**प्रश्ना:**

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in one word : (Only two questions) $2\times\frac{1}{2}=1$

(i) तदापि क: मां भाषयति ?

(ii) भर्त्रा सदैव का भर्तव्या रक्षितव्या च ?

(iii) मदालसाया: कस्यां न प्रवृत्ति: ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए : (केवल दो प्रश्न)

Answer in a complete sentence : (Only two questions) $2\times1=2$

(i) त्रिवर्गं कौ साधयत: ?

(ii) कस्मै भार्या भर्तु: सहायिनी भवति ?

(iii) पति: यदि स्वार्जितं प्रभूतं धनं गृहमानयति तत् पत्न्यभावे तद्धनं कां गतिं भजते ?

(इ) यथानिर्देशम् उत्तरत : (केवलं प्रश्नद्वयम्)

निर्देशानुसार उत्तर दीजिए : (केवल दो प्रश्न)

Answer as directed : (Only two questions) $2\times1=2$

(i) 'साधयत:' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(ii) 'निवृत्ति:' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

(iii) 'सहायिनी' शब्दस्य विशेष्यपदं किं प्रयुक्तम् ?

**12.** (क) अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।

निम्नलिखित पद्य का भावार्थ मञ्जूषा में दिए गए शब्दों से भरकर पुनः लिखिए।

Rewrite the gist of the following verse by filling it with the help of the words given in the box. *3×1=3*

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।

स पिता पितरस्तासां, केवलं जन्महेतवः॥

**भावार्थः**

राजा दिलीपः प्रजानां विनम्रताशिक्षणात् (i) __________ भरणात् अपि (ii) __________ आसीत्। तासां पितरः तु केवलं (iii) __________ आसन्।

**मञ्जूषा**

| पिता, जन्महेतवः, रक्षणात्। |
|---|

**अथवा (OR)**

(ख) प्रदत्तभावत्रयात् शुद्धं भावार्थं चित्वा लिखत।

दिए गए तीन भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए।

Write the correct essence from three essences of the following each part. *3×1=3*

(अ) वेदमनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति।
- (i) आचार्यः वेदं पाठयति।
- (ii) शिष्यः वेदं पठति।
- (iii) आचार्यः वेदं पाठयित्वा शिष्यम् उपदिशति।

(आ) अपूर्वः खल्वस्यायासः।
- (i) अस्य आयासः प्रशंसनीयः।
- (ii) अस्य प्रयासः विफलः।
- (iii) अस्य (लक्ष्मणस्य) प्रयासः निश्चितरूपेण अद्वितीयः।

(इ) 'मया दृढं परीक्षितोऽसि।'
- (i) अहं तव कठिनपरीक्षां कृतवान्।
- (ii) मया त्वं परीक्ष्यसे।
- (iii) त्वं मया सम्यक् दृष्टः असि।

**13.** अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्त-शब्दानां सहायतया पूरयत।

निम्नलिखित श्लोक के दिए गए अन्वय में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए शब्दों की सहायता से कीजिए।

The prose-order rendering of the following verse is given. Fill in the blanks with the help of words given in the box. *3×1=3*

दम्भो दर्पोऽभिमानश्च क्रोध: पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्॥

**अन्वय:**

हे पार्थ ! दम्भ: (i) ____________ अभिमान: च क्रोध: पारुष्यम् एव च अज्ञानं च (ii) ____________ संपदम् (iii) ____________ (लक्षणमस्ति)।

**मञ्जूषा**

| |
|---|
| आसुरीम्, दर्प:, अभिजातस्य। |

**14.** 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तवाक्यै: सह मेलनं कुरुत।

'क' स्तम्भ के वाक्यों का 'ख' स्तम्भ के उपयुक्त वाक्यों के साथ मिलान कीजिए।

Match the sentences of column 'क' with suitable sentences of column 'ख'. $4\times\frac{1}{2}=2$

| | *'क' स्तम्भ:* | | *'ख' स्तम्भ:* |
|---|---|---|---|
| i. | भरतो वा भवेद् राजा | 1. | भवादृशानां प्रवेशसमयो भवति। |
| ii. | आचार्याय प्रियं धनमाहृत्य | 2. | वयं वा ननु तत्समम्। |
| iii. | महाराजस्य सन्ध्योपासनसमये | 3. | भोज: किमपि वत्सराजं कथितवान्। |
| iv. | आत्मनो वधयोजनां ज्ञात्वा | 4. | प्रजातन्तुं मा व्यवच्छेत्सी:। |

**15.** अधोलिखित-वाक्येषु रेखाङ्कित-पदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषात: चित्वा लिखत।
निम्नलिखित वाक्यों में रेखांकित पदों का प्रसंगानुसार शुद्ध अर्थ मञ्जूषा से चुनकर लिखिए।
Choose and write the appropriate meanings of the underlined words in the following sentences with the help of the words given in the box. $4\times\frac{1}{2}=2$

(i) प्रसक्ता: कामभोगेषु पतन्ति नरके-अशुचौ।

(ii) नैकेनापि समं गता वसुमती।

(iii) सर्वस्य लोचनं शास्त्रम्।

(iv) त्वादृशा एव वस्तुत: पुरस्कारभाजनानि भवन्ति।

**मञ्जूषा**

| |
|---|
| पृथ्वी, अपवित्रे, पात्राणि, नेत्रम्। |

**खण्ड: 'घ'**

**(ii) संस्कृतसाहित्यस्य सामान्यपरिचय:** *10 अङ्का:*

**संस्कृत साहित्य का सामान्य परिचय**

**General Introduction to Sanskrit Literature**

**16.** अधोलिखित-प्रश्नानाम् उत्तराणि लिखत। (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर लिखिए। (केवल तीन प्रश्न)
Answer the following questions. (Only three questions) $3\times1=3$

(i) 'मातुराज्ञा गरीयसी' इति पाठ: कस्मात् पुस्तकात् संगृहीत: ?

(ii) 'शिवराजविजयम्' इति ग्रन्थस्य रचनाकार: क: ?

(iii) 'प्रजानुरञ्जको नृप:' अस्य पाठस्य लेखक: क: ?

(iv) 'मदालसा' पाठस्य लेखिका का ?

**17.** मञ्जूषायां प्रदत्तशब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत। (केवलं प्रश्नत्रयम्)

मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए। (केवल तीन प्रश्न)

Fill in the blanks with the help of the words given in the box.

(Only three questions) *3×1=3*

(i) शिशुपालवध-महाकाव्यम् ________ रचना अस्ति।

(ii) दण्डिन: काव्येषु ________ प्रसिद्धमस्ति।

(iii) गद्यपद्यमयं काव्यम् ________ कथ्यते।

(iv) उपमाप्रसिद्ध: ________ अस्ति।

**मञ्जूषा**

| |
|---|
| कालिदास:, चम्पू:, माघस्य, पदलालित्यम्। |

**18.** समुचितं मेलयत :

समुचित मिलान कीजिए :

Match properly : *4×1=4*

| | | | |
|---|---|---|---|
| i. | नाट्यशास्त्रम् | 1. | बाणभट्ट: |
| ii. | नाटकस्य अन्ते | 2. | कालिदास: |
| iii. | कादम्बरी | 3. | भरतवाक्यम् |
| iv. | अभिज्ञानशाकुन्तलम् | 4. | भरतमुनि: |